४निन्दायाम् हेम० ५ग्रहकल्लोले ६व्यसने ७दुर्नीतौ च मेदि० उपरज्यते मिथ्या रूपेण सम्बध्यते ऽनेन करणे घञ्। आध्यासिकसम्बन्धेन सम्बद्धे ८विशेषणभेदे। यथा घटत्वोपरागेण पटभानम्। घटत्वं हि पटस्य आध्यासिकसम्बन्धेन सम्बद्धं विशेषणम्।

**उपराज** अव्य० सामीप्येऽव्ययी० अच् समा०। १राज्ञः सामीप्ये उपगतो राजानं सादृश्येन अत्या०स०टच् समा०। २राजतुल्ये त्रि० स्त्रियां ङीप्। ततः काश्या० भवार्थे ठञ् (औपराजिकः तद्भवे त्रि० स्त्रियां ङीप्। तदर्थे ञिठोऽपि रूपमेकं स्त्रियां तु टाप् इति भेदः

**उपराधय** त्रि० उप+राध-णिच्-बा० श। उपसेवके। ततः ब्राह्मणा० भावे कर्म्मणि च ष्यञ्। औपराधय्य तद्भावे तत्कर्म्मणि च न०।

**उपराम** पु० उप+रम-घञ् वा वृद्धिः। १उपरतौ २मृत्यौ ३निवृत्तौ ४संन्यासे च। अव्ययी०। ५रामसामीप्ये अव्य०

**उपराव** पु० उप+रु-घञ्। समीपोच्चारितशब्दे

**उपरि** अव्य० ऊर्द्ध+रिल् उपादेशश्च। प्रथमापञ्चमीसप्तम्यन्तार्थवृत्तेः ऊर्द्ध शब्दस्यार्थे। ऊर्द्धं पुरम् ऊर्द्धा वा वसतिः ऊर्द्धात् पुरात् ऊर्द्धाया वा वसतेरागतः ऊर्द्धे पुरे ऊर्द्धायां वा वसतौ वसति इत्याद्यर्थे सर्वत्र उपरीत्येव। "तदुपर्य्यपि वादरायणः" शा०सू०। 'नीचीनाः स्थुरुपरि बुध्न एषामस्मे" ऋ० १,२४,७. "अधः स्विदासीदुपरि स्विदासीत्। १०,१२९,५, "तत्पाणिनात्मोपरि पातुकन्तु" नैष०। "त्वय्यासन्ने नयनमुपरिस्पन्दि शङ्के मृगाक्ष्याः" मेघ०। "अपाङ्गमुखस्योपरि पुष्पवृष्टिः" "परस्परस्योपरि पर्य्यचीयत" रघुः। "छित्त्वा मांसानि शस्त्रेण यद्दिशोपरिजो भवेत् सुश्रु०। "उपरिजतरुजानि याचमानाम्" किरा०। "मिथ्या ततस्त्वादुपरिमता भङ्गेन" यजु० ७,२, अस्य सामीप्ये द्वित्वं उपर्य्युपरि समीपोर्द्ध्वे अव्य० "उपर्य्युपर्य्यभ्रमुचां विताने" माघः। "अभितःसर्व्वतसोःकार्य्या धिगुपर्य्यादिषु त्रिषु। द्वितीयाम्रेडितान्तेषु ततोऽन्यत्रापि दृश्यते" इत्युक्तेः तद्योगे सम्बन्धिनि द्वितीया। "उपर्य्युपरि लोकं हरिः" सि०कौ०। "उपर्य्युपरि गच्छन्तः शैलराजमुदङ्मुखाः" भा० आ० ४१४ अ०। बाहुलकात् क्वचिन्न। "उपर्य्युपरि बुद्धीनां चरन्तीश्वरबुद्धयः"।

**उपरिचर** त्रि० उपरि+चर-ट। १ऊर्द्ध्वचरे विहगादौ। २राजभेदे पु०। स च वसुनामा चेदिदेशपतिः शक्रध्वजपूजाप्रवर्त्तकः। तस्येतिवृत्तं च भा० आ० ६३अ०। "राजोपरिचरो नाम धर्म्मनित्यो महीपतिः" इत्युपक्रम्य तुष्टेन शक्रेण तस्मै आकाशगं विमानं दत्तं तत्र चरणादुपरिचरनामेत्युक्तं यथा "देवोपभोग्यं दिव्यञ्च आकाशे स्फाटिकं महत्। आकाशगं त्वां मद्दत्तं विमानमुपपत्स्यते। त्वमेकः सर्व्वमर्त्येषु विमानवरमास्थितः। चरिष्यस्युपरिस्थो हि देवो विग्रहवानिव। ददामि ते वैजयन्तीं मालामम्लानपङ्कजाम्। धारयिष्यति संग्रामे या त्वां शस्त्रैरविक्षतम्। लक्षणं चैतदेवेह भविता ते नराधिप। इन्द्रमालेति विख्यातं धन्यमप्रतिमं महत्। वैशम्पायन उवाच। यष्टिञ्च वैणवीं तस्मै ददौ वृत्रनिषूदनः। इष्टप्रदानमुद्दिश्य शिष्टानां प्रतिपालनीम्। तस्याः शक्रस्य पूजार्थं भूमौ भूमिपतिस्तदा। प्रवेशं कारयामास गते संवत्सरे तदा। ततः प्रभृति चाद्यापि यष्ट्याः क्षितिपसत्तमैः। प्रवेशः क्रियते राजन् यथा तेन प्रवर्त्तितः। अपरेद्युस्ततस्तस्याः क्रियतेऽत्युच्छ्रयो नृपैः। अलङ्कृतायाः पिटकैर्गन्धैर्माल्यैश्च भूषणैः। माल्यदामपरिक्षिप्ता विधिवत् क्रियतेऽपि च। भगवान् पूज्यते चात्र हंसरूपेण शङ्करः। स्वयमेव गृहीतेन वसोः प्रीत्या महात्मनः। स तां पूजां महेन्द्रस्तु दृष्ट्वा देवः कृतां शुभाम्। वसुना राजमुख्येन प्रीतिमानब्रवीत् प्रभुः। ये पूजयिष्यन्ति नरा राजानश्च महं मम। कारयिष्यन्ति च मुदा यथा चेदिपतिर्नृपः। तेषां श्रीर्विजयश्चैव सराष्ट्राणां भविष्यति। तेषां स्फीतो जनपदो मुदितश्च भविष्यति। एवं महात्मना तेन महेन्द्रेण नराधिपः। वसुः प्रीत्या मघवता महाराजोऽभिसत्कृतः। उत्सवं कारयिष्यन्ति सदा शक्रस्य ये नराः। भूमिरत्नादिभिर्दानैस्तथा पूज्या भवन्ति ते। वरदानमहायज्ञैस्तथा शक्रोत्सवेन च। संपूजितो मघवता वसुश्चेदीश्वरो नृपः। पालयामास धर्म्मेण चेदिस्थः पृथिवीमिमाम्। इन्द्रप्रीत्या चेदिपतिश्चकारेन्द्रमहं वसुः। पुत्राश्चास्य महावीर्य्याः पञ्चासन्नमितौजसः। नानाराज्येषु तान् पुत्रान् स सम्राडभ्यषेचयत्। महारथो मागधानां विश्रुतो यो बृहद्रथः। प्रत्यग्रहः कुशाम्बश्च यमाहुर्मणिवाहनम्। मावेल्लश्च यदुश्चैव राजन्यश्चापराजितः। एते तस्य सुता राजन् राजर्षेर्भूरितेजसः। न्यवेशयन्नामभिः स्वैस्ते देशांश्च पुराणि च। वासवाः पञ्च राजानः पृथग्वंशाश्च शाश्वताः। वसन्तमिन्द्रप्रासादे आकाशे स्फाटिके च तम्। उपतस्थु-